# श्रीसूक्त

ॐ हिरण्यवर्णाम् हरिणीं सुवर्णरजतस्त्रजाम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।१।।
ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहम् ।।२।।
ॐ अश्वपूर्वाम् रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्री र्मा देवीर्जुषताम् ।।३।।
ॐ का सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।४।।
ॐ चंद्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनी मीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ।।५।।
ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ।।६।।
ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽसु राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ।।७।।
ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयामहम् ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ।।८।।

ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।९।।
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।।१०।।
ॐ कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।११।।
ॐ आपः स्त्रजन्तु स्निग्धानि चिल्कात वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ।।१२।।
ॐ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णाम् हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।१३।।
ॐ आर्द्रां यःकरिणीं यष्टिं पिंगलां पद्ममालिनीम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।१४।।
ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान् विंदेयं पुरुषानहम् ।।१५।।
ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पंचदशर्चम् च श्रीकामः सततं जपेत् ।।१६।।